# Vanchadatri Stotram

# વાઞ્છાદાત્રીસ્તોત્રમ્

## Document Information

Text title : Bala Vanchadatri Stotram

File name : vAnChAdAtrIstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# વાઞ્છાદાત્રીસ્તોત્રમ્

ઐં વિદ્યાક્ષમાલાસુકપાલમુદ્રારાજત્કરાં કુન્દસમાનકાન્તિમ્ ।
મુક્તાફલાલઙ્કૃતશોભનાઙ્ગીં બાલાં ભજે વાઙ્મયસિદ્ધિહેતોઃ ॥ ૧॥

ક્લીં ભજે કલ્પવૃક્ષાધ ઉદ્દીપ્તરત્નાસને સન્નિષણ્ણાં મદાઘૂર્ણિતાક્ષીમ્ ।
કરૈર્બીજપૂરં કપાલેષુચાપં સપાશાઙ્કુરાં રક્તવર્ણાં દધાનામ્ ॥ ૨॥

સૌઃ વ્યાખ્યાનમુદ્રામૃતકુમ્ભવિદ્યાં અક્ષસ્રજં સન્દધતીં કરાબ્જૈઃ ।
ચિદ્રૂપિણીં શારદચન્દ્રકાન્તિં બાલાં ભજે મૌક્તિકભૂષિતાઙ્ગીમ્ ॥ ૩॥

પાશાઙ્કુશૌ પુસ્તકમક્ષસૂત્રં કરૈર્દધાનાં સકલામરાર્ચ્યામ્મ્ ।
રક્તાં ત્રિણોત્રાં શશિશેખરાં તાં ભજેઽખિલર્ધ્યૈ ત્રિપુરાં ચ બાલામ્ ॥ ૪॥

આરક્તાં શશિખણ્ડમણ્ડિતજટાજૂટાનુબદ્ધસ્રજં
    બન્ધૂકપ્રસવારુણામ્બરધરાં રક્તામ્બુજાધ્યાસિનીમ્ ।
ત્વાં ધ્યાયામિ ચતુર્ભુજાં ત્રિણયનામાપીનરમ્યસ્તનીં
    મધ્યે નિમ્નવલિત્રયાઙ્કિતતનું ત્વદ્રૂપસમ્પત્તયે ॥ ૫॥

આધારે તરુણાર્કબિમ્બરુચિરં સોમપ્રભં વાગ્ભવં
    બીજં માન્મથમિન્દ્રગોપકનિભં હૃત્પઙ્કજે સંસ્થિતમ્ ।
રન્ધ્રે બ્રહ્મપદે ચ શાક્તમપરં ચન્દ્રપ્રભાભાસુરં
    યે ધ્યાયન્તિ પદત્રયં તવ શિવે તે યાન્તિ સૂક્ષ્મં પદમ્ ॥ ૬॥

રક્તામ્બરાં ચન્દ્રકલાવતંસાં સમુદ્યદાદિત્યનિભાં ત્રિણેત્રામ્ ।
વિદ્યાક્ષમાલાભયદાનહસ્તાં ધ્યાયામિ બાલામરુણામ્બુજસ્થામ્ ॥ ૭॥

અકલઙ્કશશાઙ્કાભા ત્ર્યક્ષા ચન્દ્રકલાવતી ।
મુદ્રાપુસ્તલસદ્બાહા પાતુ માં પરમા કલા ॥ ૮॥

માતુલિઙ્ગપયોજન્મહસ્તાં કનકસન્નિભામ્ ।
પદ્માસનગતાં બાલાં ધ્યાયામિ ધનસિદ્ધયે ॥ ૯॥

વરપીયૂષકલશપુસ્તકાભીતિધારિણીમ્ ।
સુધાં સ્રવન્તીં જ્ઞાનાપ્ત્યૈ બ્રહ્મરન્ધ્રે વિચિન્તયે ॥ ૧૦॥

શુક્લાબરાં શશાઙ્કાભાં ધ્યાયામ્યારોગ્યદાયિનીમ્ ।
સૃણિપાશધરાં દેવીં રત્નાલઙ્કારભૂષિતામ્ ॥ ૧૧॥

અકારાદિક્ષકારાન્તવર્ણાવયવશાલિનીમ્ ।
પ્રસન્નામરુણામીક્ષે સૌમનસ્યપ્રદાં શિવામ્ ॥ ૧૨॥

પુસ્તકજપવટહસ્તે વરદાભયચિહ્નબાહુલતે ।
કર્પૂરામલદેહે વાગીશ્વરિ ચોદયાશુ મમ ચેતઃ ॥ ૧૩॥

ઇતિ વાઞ્છાદાત્રીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Vanchadatri Stotram*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*